शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)

अलङ्कार विवेचनम्

सा० द० दशम परिच्छेदः

## सङ्करालङ्कार विवेचनम्

'अङ्गाङ्गित्वेऽलङ्कृतीनां तद्वदेकाश्रयस्थितौ ।
सन्दिग्धत्वे च भवति सङ्करस्त्रिविधः पुनः ॥'

(1) यस्मिन् पद्ये प्रधानाप्रधानभावेन अलङ्काराणां स्थितिर्भवति तत्र अङ्गाङ्गिभाव सङ्करः अलङ्कारो भवति ।

(2) यस्मिन् पद्ये वाक्ये वा एकमेव आश्रयमवलम्ब्य द्वयोस्त्रयाणां वा अलङ्काराणां अवस्थितिर्भवति तत्र एकाश्रयानुप्रवेश सङ्करालङ्कारो भवति ।

(3) यस्मिन् पद्ये वाक्ये वा अयमलङ्कारो वा अन्योऽलङ्कारो भवति इति तत्र निर्णायक प्रमाणाभावेन सन्देहो भवति तत्र सन्देह सङ्करालङ्कारः भवति । त्रिविधेऽपि अस्मिन् सङ्करे 'नीर क्षीर न्यायेन' अलङ्काराणां पार्थक्येन प्रतीतिर्न भवतीति संसृष्टितो वैलक्षण्यम् ।

तत्र अङ्गाङ्गिभावो यथा —

'आकृष्टिवेगविगलद्भुजगेन्द्रभोगनिर्मोकपट्टपरिवेष्टनयाम्बुराशेः ।
मन्थव्यथाव्युपशमार्थमिवाशु यस्य मन्दाकिनी चिरमवेष्टत पादमूले ॥'

अत्र निर्मोकपट्टापह्नवेन मन्दाकिन्या आरोप इति अपह्नुतिः । सा च मन्दाकिन्या वस्तुत्वेन पादमूलवेष्टनं तच्चरणमूलवेष्टनमिति इत्यनुत्थापयतीति तस्याङ्गम् । इत्थञ्च पादमूलवेष्टनमेव चरणमूलवेष्टनमित्यतिशयोक्तेरङ्गम् । अतिशयोक्तिश्च 'मन्थव्यथाव्युपशमार्थमिव' इत्युत्प्रेक्षाया अङ्गम् । यथा वा —

'अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः ।
अहो दैवगतिश्चित्रा तथापि न समागमः ॥'

अत्र लिङ्गसादृश्यप्रयुक्ता समासोक्तिः विशेषोक्तेरङ्गम् । सन्देह सङ्करो यथा —

'इदमाभाति गगने भिन्दानं सन्ततं तमः ।
अमन्दनयनानन्दकरं मण्डलमैन्दवम् ॥'

अत्र किं मुखस्य चन्द्रतयाऽध्यवसानादतिशयोक्तिः, उत इदमिति मुखं निर्दिश्य चन्द्रत्वारोपाद्रूपकम् । अथवा इदमिति मुखस्य चन्द्रमण्डलस्य च द्वयोरपि प्रकृतयोरेकधर्माभिसम्बन्धात् तुल्ययोगिता, आहोस्वित् चन्द्रस्याप्रकृतत्वाद् दीपकम्, किं वा विशेषण साम्याद् अप्रस्तुतस्य मुखस्य गम्यत्वात्समासोक्तिः, यद्वा अप्रस्तुत प्रशंसा यद्वा मन्मथोद्दीपनः कालः स्वकार्यभूतचन्द्रपर्यायमुखेन वर्णित इति पर्यायोक्तिरिति बहूनामलङ्काराणां सन्देहात् सन्देहसङ्करः

एकाश्रयानुप्रवेशसङ्करो यथा —

'संसारध्वान्तविध्वंस हंस कंसनिषूदन ।' इति

अत्र छेकानुप्रासयोरेकाश्रयानुप्रवेशात् सङ्करः । यथा वा - 'कुरवका रवकारणतां ययुः' । इत्यत्र 'रवका रवका' इत्येक 'वकार रकार' इत्यत्र इति यमकयोरेकाश्रयानुप्रवेश रूप सङ्करालङ्कारः इति

उपेन्द्र झा
7/10/20
सहा० प्रो० साहित्य
रा० उ० सं० महावि०
बुरुसैला, पूर्णियाँ

शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)
वेणीसंहार नाम नाटकस्य श्लोक व्याख्या

"युष्मच्छासनलङ्घनांहसि मया मग्नेन नाम स्थितं
प्राप्ता नाम विगर्हणा स्थितिमतां मध्येऽनुजानामपि।
क्रोधोल्लासितशोणितारुणगदस्योच्छिन्दतः कौरवा-
नद्यैकं दिवसं ममासि न गुरुर्नाहं विधेयस्तव ॥"

प्रस्तुतोऽयं श्लोकः महाकवि भट्टनारायणेन विनिर्मितः वीररसप्रधानः वेणीसंहार नाम नाटकस्य प्रथमाङ्कात् उद्धृतोऽस्ति। श्लोकेऽस्मिन् कौरवैः सन्धि प्रस्तावेन कुपितो भीमः सहदेवं कथयति यदग्रजं भ्रातरं (युधिष्ठिरं) प्रति एतत् कथय - एकैक दिवसं भवान् मम ज्येष्ठ भ्राता नास्ति अहमपि तेऽनुजश्च नास्मि, अर्थात् अद्याहं तवाज्ञा पालने असमर्थोऽस्मि।

युष्मच्छासनलङ्घनांहसि मया मग्नेन स्थितं नाम, स्थितिमतां अनुजानाम् अपि मध्ये विगर्हणा प्राप्ता नाम। क्रोधोल्लासित शोणितारुणगदस्य कौरवान् उच्छिन्दतः मम अद्य एकं दिवसं त्वं गुरुः न असि, अहं च तव विधेयः नास्मि।

युष्मच्छासनलङ्घनांहसि = युष्माकं यत् शासनं आज्ञा लङ्घनं तस्य लङ्घनं तदेवांहस्तस्मिन् = भवत् आज्ञा लङ्घनं महापातके। मया = भीमसेनेन मग्नेन = निमग्नेन स्थितं नाम = सर्वैर्विदितमिति। स्थितिमताम् = स्थितिः = मर्यादा अस्ति येषां ते तेषाम् = आज्ञापालनरूप मर्यादावताम्। अनुजानाम् = लघुभ्रातॄनामपि, मध्ये = अन्तरे। विगर्हणा = निन्दा। प्राप्ता नाम = प्राप्तेति स्वीकरणे। क्रोधोल्लासित-शोणितारुणगदस्य - क्रोधेन = कोपेन उल्लासिता = प्रहर्तुमुद्यता शोणितेन = रुधिरेण, अरुणा = रक्तवर्णा गदा यस्य सः तस्य, कौरवान् = धार्तराष्ट्रान्, उच्छिन्दतः = उन्मूलयतः, मम = भीमस्य। अद्य = अस्मिन् दिने, एकं दिवसम् = एकं दिनं यावत्, त्वम् = भवान् युधिष्ठिरः गुरुः = ज्येष्ठः न असि = नहि भवसि। अहं = भीमसेनः च तव = ते विधेयः = विधेयः आदेशपालनः न भवामीति। अत्र शार्दूलविक्रीडितं वृत्तम्। तल्लक्षणं यथा -
'सूर्याश्वैर्मसजास्ततः स गुरवः शार्दूलविक्रीडितम्'
इति

उपेन्द्र झा
५।१०।२०
स्नातकोत्तर साहित्य
रा० उ० सं० महाविद्यालय
खुटहेना, झंझारपुर

शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)

## महाकवेः कालिदासस्य अभिज्ञानशाकुन्तले मौलिकोद्भावनानां, मूलकथानके परिवर्तनस्य विवेचनम् ।

कविः इतिहासतो रसवाधं गृह्णाति सः 'सत्यं शिवं सुन्दरम्' इत्येतस्य समुपासको भवति । इत्यमनुसरतः महाकवि कालिदासः अभिज्ञानशाकुन्तलस्य कथानकः महाभारतात् एव गृहीतः । अभिज्ञानशाकुन्तलं काव्यपुरुषस्य कविता वनितायाश्च शिरो भूषणायितं तिष्ठति —

'काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला ।' इति

अभिज्ञान शाकुन्तले औचित्य निर्वाहार्थं मूल कथानके कृतानां परिवर्तनानां कानिचिदुदाहरणं उपस्थाप्यन्ते —

(1) मूलकथानके मृगयासक्तो राजा दुष्यन्तः ससैन्यो महर्षेः कण्वस्याश्रमं समीपमागतः ।
अभिज्ञान शाकुन्तले सैनिकाः पश्चादेव क्वापि गताः । अग्रे-अग्रे सारथि मात्र द्वितीयो राजा आश्रममागतः । तत्र च आतिथ्याय कण्व शिष्यैः वैखानसैः आमन्त्रितः सन् द्वारे सारथिं परित्यज्य आश्रमं प्रविष्टः ।

(2) मूलकथायां एकाकी आश्रमं प्रविष्टस्य राज्ञः महर्षि कण्वस्यानुपस्थितौ प्रथमं शकुन्तला दर्शनं जातम् । अनयोः साक्षात्कारं वार्तादिकं जातम् ।
अभिज्ञानशाकुन्तले आश्रमं प्रविष्टो राजा वृक्षसेचनकं कुर्वन्तीं शकुन्तलां ददर्श । किन्तु तयोः सम्मिलनं तदा जातं यदा शकुन्तला केनचित् दुष्टभ्रमरेण परिबाधिता जाता तथा —
"कुतः परित्रायेथां मामनेन दुष्टमधुकरेणाभिभूयमानाम्" इति शकुन्तलायाः प्रार्थनायां सख्यौ — 'के आवां परित्रातुं? दुष्यन्तं सवत् समाक्रन्दस्व । यतो हि राजरक्षितानि तपोवनानीति' उत्तरमुक्तम् ।

(3) मूलकथानके कापि शर्तं कृत्वा शकुन्तला राज्ञः आतिथ्यं करोति । वार्ता प्रवृत्ते च विश्वामित्रतः स्वोत्पत्तिं वर्णयति राज्ञः प्रेमविषयतां च याचते —
अभिज्ञान शाकुन्तले समुचितेन रूपेण आश्रमं प्रविष्टस्य राज्ञः शकुन्तला साक्षात्कारे जाते राजा समुचितेन रूपेण शकुन्तला विषये पृच्छति सखी तज्जन्मवृत्तं वर्णयति ।

(4) मूलकथानके राज्ञा विवाहिता शकुन्तला वर्षत्रयानन्तरं पुत्रं उत्पादितवती तथा पुत्रोत्पत्तेरपि षड्वर्षानन्तरं (विवाहानन्तरं वर्षानन्तरम्) कण्वेन पतिगृहं प्रेषिता ।
अभिज्ञान शाकुन्तले प्रवासात् प्रति निवृत्तेन आकाशवाण्या ज्ञात वृत्तान्तेन कण्वेन तत्कालमेव शकुन्तला पतिगृहं प्रेषिता ।

(5) मूलकथानुसारं षड्वर्षदेशीयेन पुत्रेण सह शकुन्तला पतिगृहं गता । स्मरन्नपि राजा तां न स्वीकृतवान् तदा आकाशवाण्यनन्तरं स्वीकारोति ।
अभिज्ञान शाकुन्तलानुसारं गर्भिण्येव शकुन्तला दुष्यन्तं प्रेषिता । दुर्वासा शापवशात् विस्मृत विवाह वृत्तान्तेन राजा तां तिरस्कृता चेति पश्चात् विलपन् राजा प्राप्ताभिज्ञाने स्मृत शकुन्तलां अन्विष्यन् मारीचाश्रमे तां प्राप्तवान् ।

एवं महाकविना कथानके किञ्चित् किञ्चित् मौलिकमुद्भावितं कृतमपि । मूलकथानके दुर्वासा शापस्य कथा, अनयोः मेलने सख्योः अनसूया-प्रियंवदयोरपि भूमिका नास्ति ।
एवं मूलकथानके परिवर्तनं सख्योपाख्यानं कौलिककानि कल्पनानि औचित्यं सम्पादयन् रस सिद्धेन कवीश्वरेण अभिज्ञानशाकुन्तलस्य कथानकस्य चमत्कारो विहितः । यतश्चेदं नाटकं संस्कृत साहित्य शिरोमणि स्थानमिति ।

उपेन्द्र झा
५/१०/२०
सहा० प्रो० साहित्य
रा० उ० सं० महाविद्यालय
सुरतौल, दरभंगा